## चतुष्पादो गर्भिण्या। (७१/७५३)

चतुष्पाद्वाचिनः सुबन्ता गर्भिणीशब्देन[1] समस्यन्ते, तत्पुरुषश्च समासो भवति। गोर्गर्भिणी। [2]अजागर्भिणी।

[८४] चतुष्पाज्जातिरिति वक्तव्यम्। (म.भा. १.४०६)

इह मा भूत् – कालाक्षी गर्भिणी, स्वस्तिमती गर्भिणी (म.भा. १.४०६)।

चतुष्पादः इति किम्? ब्राह्मणी गर्भिणी ॥

## मयूरव्यंसकादयश्च। (७२/७५४)

समुदाया एव निपात्यन्ते। मयूरव्यंसकादयः शब्दाः[3]तत्पुरुषसञ्ज्ञा भवन्ति। चकारोऽवधारणार्थः, परममयूरव्यंसकः इति समासान्तरं न भवति।

मयूरव्यंसकः। छात्रव्यंसकः। काम्बोजमुण्डः। यवनमुण्डः। छन्दसि––हस्तेगृह्य। पादेगृह्य। लाङ्गलेगृह्य। पुनर्दाय। 'एहीडादयोऽन्यपदार्थे'(ग.सू.१८)–एहीडम्। एहियवं वर्तते। एहिवाणिजा[4]क्रिया। अपेहिवाणिजा। प्रेहिवाणिजा। एहिस्वागता। अपेहिस्वागता। [5]प्रेहिस्वागता। एहिद्वितीया। अपेहिद्वितीया। इहवितर्का। प्रोहकटा। अपोहकटा। [6]प्रोहकर्दमा। अपोहकर्दमा। उद्धरचूडा। आहरचेला। आहरवसना। [7]आहरवनिता। [8]कृन्तविचक्षणा। [9]उद्धरोत्सृजा। [10]उद्धमविधमा। उत्पचविपचा। उत्पतनिपता। उच्चावचम्। उच्चनीचम। [11]अचितोपचितम्। अवचितपराचितम्। [12]निश्चप्रचम्। [13]अकिञ्चनम्। स्नात्वाकालकः। पीत्वास्थिरकः। भुक्त्वासुहितः। प्रोष्यपापीयान्। उत्पत्यपाकला। निपत्यरोहिणी। निषण्णश्यामा। [14]अपेहिप्रसवा। इहपञ्चमी। इहद्वितीया।

'जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति' (ग.सू. १९)–जहिजोडः। उज्जहिजोडः। जहिस्तम्बः। उज्जहिस्तम्बः।

'आख्यातमाख्यातेन क्रियासातत्ये' (ग.सू.२०)–अश्नीतपिबता। [15]पचतभृज्जता। खादतमोदता। [16]खादतवमता। खादताचमता। आहरनिवपा। आवपनिष्किरा। [17]उत्पचविपचा। [18]भिन्धिलवणा। छिन्धिविचक्षणा। पचलवणा। पचप्रकूटा। अविहितलक्षणस्तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्यः ॥

इति [19]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ द्वितीयाध्यायस्य प्रथमः पादः ॥

––०––

1. समानाधिकरणेन सह इत्यधिकम् क, सह इत्यधिकम् इ. 2. अजगर्भिणी फ. 3. तत्पुरुषसमाससंज्ञाः क. 4. क्रिया नास्ति फ. 5. प्रेहिस्वागता एहिद्वितीया नास्ति फ. 6. प्रेहिकर्दमा क. 7. आहरविनता फ. 8. कृन्धि° अ. 9. उद्धरविसृजा फ. 10. उद्धमनिषजा फ. 11. आत्तोपात्तम् ब. 12. निश्चितप्रचितम् फ. 13. सकिंचन क. 14. एहिविघसा अ. 15. पचतभुज्जता फ. 16. खादतवमता खादताचमता नास्ति फ. 17. नास्ति फ. 18. कृन्धिलवणा क, नास्ति फ. 19. श्री नास्ति क.ग, विरचितायां नास्ति ङ.